I am like fire. As fire gives heat to those who draw near to it, and not to those who move away from it, even so do I. My grace falls upon My devotees, but not owing to any attachment on My

part. As the sun's light, though pervading everywhere, is reflected in a clean mirror, so also I, the Supreme Lord, present as a matter of course everywhere, manifest Myself in these persons only, from whose minds all the dirt of ignorance has been removed by devotion.

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ।।३०।।

सुदुराचारः A very wicked person अपि even चेत् if अनन्यभाक् with devotion to none else माम् Me भजते worships सः he साधुः good एव verily मन्तव्यः should be regarded हि indeed सः he सम्यक् rightly व्यवसितः resolved.

30. If even a very wicked person worships Me, with devotion to none else, he should be regarded as good, for he has rightly resolved.

*He has rightly resolved*: He is one who has formed a holy resolution, to abandon the evil ways of his life.

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।।३१।।

क्षिप्रं Soon धर्मात्मा righteous भवति (he) becomes शश्वत् eternal शान्तिं peace निगच्छति attains to कौन्तेय O son of Kuntī मे My भक्तः devotee न प्रणश्यति is never destroyed (इति this) प्रतिजानीहि know (do thou proclaim boldly).

31. Soon does he become righteous, and attain eternal Peace, O son of Kuntī; boldly canst thou proclaim, that My devotee is never destroyed.

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ॥
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्
॥३२॥

पार्थ O son of Pṛthā ये who अपि also पापयोनयः of inferior birth स्युः might be स्त्रियः women वैश्याः Vaiśyas तथा as well as शूद्राः Śūdras ते they अपि even मां Me व्यपाश्रित्य taking refuge in परां the Supreme गतिम् Goal हि indeed यान्ति attain.

32. For, taking refuge in Me, they also, O son of Pṛthā, who might be of inferior birth—women, Vaiśyas, as well as Śūdras—even they attain to the Supreme Goal.

*Of inferior birth . . . Śūdras*: Because by birth, the Vaiśyas are engaged only in agriculture, etc., and the women and Śūdras are debarred from the study of the Vedas.

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३॥

पुण्याः Holy ब्राह्मणाः Brāhmaṇas तथा also भक्ताः devoted राजर्षयः *Rājarṣis* किं पुनः how much more

अनित्यम् transient असुखं joyless इमं the लोकम् world प्राप्य having attained भजस्व do thou worship माम् Me.

33. What need to mention holy Brāhmaṇas, and devoted *Rājarṣis*! Having obtained this transient, joyless world, worship thou Me.

*Rājarṣis*: kings who have attained to sainthood (*Ṛṣihood*).

*What need, etc.*: How much more easily then do the holy Brāhmaṇas and the devoted royal saints attain that Goal!

*Having. . . world*: Being born in this human body which is hard to get, one should exert oneself immediately for perfection, without depending on the future, as everything in this world is transient, and without seeking for happiness, as this world is joyless.

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ।।३४।।

मन्मनाः With mind filled with Me मद्भक्तः My devotee मद्याजी sacrificer unto Me भव be thou मां to Me नमस्कुरु bow down एवम् thus मत्परायणः taking Me as the Supreme Goal आत्मानं heart युक्त्वा having made steadfast माम् Me एव alone एष्यसि thou shalt come to.

34. Fill thy mind with Me, be My devotee, sacrifice unto Me, bow down to Me; thus having made thy heart steadfast in Me,

taking Me as the Supreme Goal, thou shalt come to Me.

इति राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ।।

The end of the ninth chapter, designated, *The Way of the Kingly Knowledge and the Kingly Secret.*

॥ दशमोऽध्यायः ॥

## TENTH CHAPTER

श्रीभगवानुवाच ।

भूय एव महाबाहो शृणु मे परमं वचः ॥
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

महाबाहो O mighty-armed भूयः again एव verily मे My परमं supreme वचः word शृणु hear (thou) यत् which प्रीयमाणाय who art delighted (to hear) ते to thee अहं I हितकाम्यया wishing (thy) welfare वक्ष्यामि will tell.

The Blessed Lord said:

1. Again, O mighty-armed, do thou listen to My supreme word, which I, wishing thy welfare, will tell thee who art delighted (to hear Me).

*Supreme*: as revealing the unsurpassed truth.

न मे विदुः सुरगणाः प्रभवं न महर्षयः ॥
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥२॥

न Not सुरगणाः the hosts of Devas न nor महर्षयः the great *Ṛṣis* मे My प्रभवं origin विदुः do know हि for अहम् I

देवानां of the Devas महर्षीणां of the great *Ṛṣis* च and सर्वशः in every way आदिः source.

2. Neither the hosts of Devas, nor the great *Ṛṣis*, know My origin, for in every way I am the source of all the Devas and the great *Ṛṣis*.

*Prabhavam*: higher origin (birth)—though birthless, yet taking various manifestations of power. Or it may mean, great Lordly power.

*In every way*: not only as their producer, but also as their efficient cause, and the guide of their intellect, etc.

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ।।३।।

यः Who माम् Me अनादिं beginningless अजम् birthless च and लोकमहेश्वरम् the great Lord of worlds वेत्ति knows सः he मर्त्येषु among mortals असंमूढः undeluded सर्वपापैः from all sins प्रमुच्यते is freed.

3. He who knows Me, birthless and beginningless, the great Lord of worlds—he, among mortals, is undeluded, he is freed from all sins.

*All sins*: consciously or unconsciously incurred.

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ।।४।।

अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ।।५।।

बुद्धिः Intellect ज्ञानम् knowledge असंमोहः non-delusion क्षमा forbearance सत्यं truth दमः restraint of the external senses शमः calmness of the heart सुखं happiness दुःखं misery भवः birth अभावः death भयं fear च and एव even अभयम् fearlessness च as well as अहिंसा non-injury समता evenness तुष्टिः contentment तपः austerity दानं benevolence यशः good name अयशः ill-fame भूतानां of beings पृथग्विधाः of different kinds भावाः qualities मत्तः from Me एव alone भवन्ति arise.

4-5. Intellect, knowledge, non-delusion, forbearance, truth, restraint of the external senses, calmness of heart, happiness, misery, birth, death, fear, as well as fearlessness, non-injury, evenness, contentment, austerity, benevolence, good name, (as well as) ill-fame—(these) different kinds of qualities of beings arise from Me alone.

*Arise, etc.*: according to their respective *Karma*.

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ।।६।।

सप्त Seven महर्षयः great *Ṛṣis* पूर्वे ancient चत्वारः four तथा as well as मनवः Manus मद्भावाः possessed of powers

like Me मानसाः from mind जाताः born लोके in this world इमाः these येषां from whom प्रजाः creatures.

6. The seven great *Ṛṣis* as well as the four ancient *Manus*, possessed of powers like Me (due to their thoughts being fixed on Me), were born of (My) mind; from them are these creatures in the world.

*The four ancient Manus*: The four *Manus* of the past ages known as *Sāvarṇas*.

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ।।७।।

यः Who मम Mine एतां these विभूतिं manifold manifestations of (My) being योगं Yoga power च and तत्त्वतः in reality वेत्ति knows सः he अविकम्पेन unshakable योगेन in Yoga युज्यते becomes established अत्र here न संशयः no doubt.

7. He who in reality knows these manifold manifestations of My being and (this) Yoga power of Mine, becomes established in the unshakable Yoga; there is no doubt about it.

*This Yoga power*: i.e., the fact that the great *Ṛṣis* and the *Manus* possessed their power and wisdom, as partaking of a very small portion of the Lord's infinite power and wisdom.

*Unshakeable Yoga*: *Samādhi*, the state of steadiness in right realisation.

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ।।८।।

अहं I सर्वस्य of all प्रभवः the origin मत्तः from Me सर्वं everything प्रवर्तते evolves इति thus मत्वा thinking बुधाः the wise भावसमन्विताः with loving consciousness मां Me भजन्ते worship.

8. I am the origin of all, from Me everything evolves—thus thinking, the wise worship Me with loving consciousness.

*Loving consciousness*: of the One Self in all.

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ।।९।।

मच्चित्ताः With (their) minds wholly in Me मद्गतप्राणाः with (their) senses absorbed in Me परस्परम् mutually बोधयन्तः enlightening च and नित्यं always कथयन्तः speaking of मां Me च and तुष्यन्ति (they) are satisfied रमन्ति (they) are delighted च and.

9. With their minds wholly in Me, with their senses absorbed in Me, enlightening one another, and always speaking of Me, they are satisfied and delighted.

*Satisfied*: when there is cessation of all thirst.

Says the *Purāṇa*: All the pleasures of the senses in the world, and also all the great happiness in the divine spheres, are not worth a sixteenth part of that which comes from the cessation of all desires.

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।१०।।

सततयुक्तानां Ever steadfast प्रीतिपूर्वकम् with affection भजतां serving तेषां to them तं that बुद्धियोगं *Buddhi-Yoga* ददामि (I) give येन by which ते they माम् Me उपयान्ति come unto.

**10. To them, ever steadfast and serving Me with affection, I give that *Buddhi-Yoga* by which they come unto Me.**

*Buddhi-Yoga*: Devotion of right knowledge, through *Dhyānā*, of My essential nature as devoid of all limitations.

See II. 39.

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।।११।।

तेषाम् For them अनुकम्पार्थम् out of compassion एव mere अहम् I आत्मभावस्थः abiding in (their) hearts भास्वता luminous ज्ञानदीपेन by the lamp of knowledge अज्ञानजं born of ignorance तमः the darkness (of their mind) नाशयामि (I) destroy.

11. Out of mere compassion for them, I, abiding in their hearts, destroy the darkness (in them) born of ignorance, by the luminous lamp of knowledge.

*Luminous lamp of knowledge*: characterised by discrimination; fed by the oil of contentment due to *Bhakti*; fanned by the wind of absorbing meditation on Me; furnished with wick of pure consciousness evolved by the constant cultivation of *Brahmacarya* and other pious virtues; held in the reservoir of the heart devoid of worldliness; placed in the wind-sheltered recess of the mind, withdrawn from the sense-objects, and untainted by attachment and aversion; shining with the light of right knowledge, engendered by incessant practice of concentration.—Śaṅkara.

अर्जुन उवाच ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ।।१२।।
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ।।१३।।

अर्जुनः Arjuna उवाच said:

भवान् Thou परं Supreme ब्रह्म Brahman परं Supreme धाम Abode परमं Supreme पवित्रं Purifier (च and) सर्वे all ऋषयः the *Ṛṣis* देवर्षिः *Deva-Ṛṣi* नारदः Nārada तथा as well as असितः Asita देवलः Devala व्यासः Vyāsa त्वाम् Thee शाश्वतं the eternal पुरुषं *Puruṣa* दिव्यम् Self-luminous आदिदेवम् the first *Deva* अजं Birthless विभुम् the All-pervading

आहुः (they) declared स्वयं Thyself च and एव also मे to me ब्रवीषि (Thou) sayest.

Arjuna said:

12-13. The Supreme Brahman, the Supreme Abode, the Supreme Purifier, art Thou. All the *Ṛṣis*, the *Deva-Ṛṣi* Nārada as well as Asita, Devala, and Vyāsa have declared Thee as the Eternal, the Self-luminous *Puruṣa*, the first *Deva*, Birthless, and All-pervading. So also Thou Thyself sayest to me.

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ।।१४।।

केशव O Keśava मां to me यत् what वदसि (Thou) sayest एतत् that सर्वम् all ऋतं true मन्ये (I) regard हि verily भगवन् O Bhagavān ते Thy व्यक्ति manifestation न neither देवाः *Devas* न nor दानवाः *Dānavas* विदुः do know.

14. I regard all this that Thou sayest to me as true, O Keśava. Verily, O Bhagavān, neither the *Devas* nor the *Dānavas* know Thy manifestation.

*Bhagavān*: is he in whom ever exist in their fulness, all powers, all Dharma, all glory, all success, all renunciation, and all freedom. Also he that knows the origin and dissolution and the future of all beings, as well as knowledge and ignorance, is called Bhagavān.

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।।
भूतभावन भूतेश देवदेव जगत्पते ।।१५।।

पुरुषोत्तम O Supreme *Puruṣa* भूतभावन O Source of beings भूतेश O Lord of beings देवदेव O *Deva* of *Devas* जगत्पते O Ruler of the world त्वं Thou स्वयम् Thyself एव verily आत्मना by Thyself आत्मानं Thyself वेत्थ (Thou) knowest.

15. Verily, Thou Thyself knowest Thyself by Thyself, O Supreme *Puruṣa*, O Source of beings, O Lord of beings, O *Deva* of *Devas*, O Ruler of the world.

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि
।।१६।।

याभिः By which विभूतिभिः (divine) attributes त्व Thou इमान् all these लोकान् worlds व्याप्य having filled तिष्ठसि existest दिव्याः divine आत्मविभूतयः Thy attributes हि indeed अशेषेण without reserve वक्तुम् to speak of अर्हसि (Thou) shouldst.

16. Thou shouldst indeed speak, without reserve, of Thy divine attributes by which, filling all these worlds, Thou existest.

Since none else can do so.

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ॥
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥१७॥

योगिन् O Yogī सदा ever परिचिन्तयन् meditating कथं how त्वां Thee अहं I विद्याम् shall know भगवन् O Bhagavān मया by me केषु केषु in what and what भावेषु aspects, things च and चिन्त्यः to be thought of असि (Thou) art.

17. How shall I, O Yogī, meditate ever to know Thee? In what things, O Bhagavān, art Thou to be thought of by me?

*In what things, etc.*: In order that the mind even thinking of external objects, may be enabled to contemplate Thee in Thy particular manifestations in them.

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ॥
भूयः कथय तृप्तिर्हि श्रृण्वतो नास्ति मेऽमृतम् ॥१८॥

जनार्दन O Janārdana आत्मनः Thy योगं Yoga-powers विभूतिं attributes च and विस्तरेण in detail भूयः again कथय speak of हि for अमृतम् ambrosia श्रृण्वतः to (me) who am hearing मे to me तृप्तिः satiety न अस्ति there is not.

18. Speak to me again in detail, O Janārdana, of Thy Yoga-powers and attributes; for I am never satiated in hearing the ambrosia (of Thy speech).

*Janārdana*: to whom all pray for prosperity and salvation.

श्रीभगवानुवाच ।

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ।।१९।।

श्रीभगवान् The Blessed Lord उवाच said:

हन्त O कुरुश्रेष्ठ best of the Kurus दिव्याः divine आत्मविभूतयः My attributes प्राधान्यतः according to their prominence ते to thee कथयिष्यामि (I) shall speak of हि for मे My विस्तरस्य particulars अन्तः end नास्ति there is not.

The Blessed Lord said:

19. I shall speak to thee now, O best of the Kurus, of My divine attributes, according to their prominence; there is no end to the particulars of My manifestation.

*According to their prominence*: i.e., only where they are severally the most prominent.

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।।
अहमादिश्च मध्यं च भूतानामन्त एव च ।।२०।।

गुडाकेश O Guḍākeśa सर्वभूताशयस्थितः existent in the heart of all beings आत्मा the Self च and अहम् I भूतानाम् of (all) beings आदिः the beginning च and मध्यं the middle अन्तः the end च and अहम् I एव also.

20. I am the Self, O Guḍākeśa, existent

in the heart of all beings; I am the beginning, the middle, and also the end of all beings.

*Guḍākeśa*: conqueror of sleep.

*Beginning* etc.: That is, the birth, the life, and the death of all beings.

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ।।२१।।

अहं I आदित्यानाम् of the (twelve) *Ādityas* विष्णुः Viṣṇu ज्योतिषां of luminaries अंशुमान् the radiant रविः the Sun मरुताम् of the winds (forty-nine wind-gods) मरीचिः Marīci अस्मि (I) am नक्षत्राणाम् of the asterisms अहं I शशी the Moon.

21. Of the *Ādityas*, I am Viṣṇu of luminaries, the radiant Sun; of the winds I am Marīci; of the asterisms, the Moon.

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ।।२२।।

वेदानां Of the Vedas सामवेदः *Sāma-Veda* अस्मि (I) am देवानाम् of the gods वासवः Vāsava अस्मि (I) am इन्द्रियाणां of the senses मनः Mind च and अस्मि (I) am भूतानाम् in living beings चेतना intelligence अस्मि (I) am.

22. I am the *Sāma-Veda* of the Vedas, and Vāsava (Indra) of the gods; of the senses

I am the mind and intelligence in living beings am I.

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ।।२३।।

रुद्राणां Of the *Rudras* शङ्करः Śaṅkara च and अस्मि (I) am यक्षरक्षसाम् of the *Yakṣas* and the *Rākṣasas* वित्तेशः the Lord of wealth (Kubera) (अस्मि I am) वसूनां of the *Vasus* पावकः Pāvaka च and अस्मि (I) am शिखरिणाम् of mountains मेरुः Meru अहम् I (अस्मि am).

23. And of the *Rudras* I am Śaṅkara; of the *Yakṣas* and *Rākṣasas*, the Lord of wealth (Kubera); of the *Vasus* I am Pāvaka; and of mountains, Meru am I.

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ।।२४।।

पार्थ O son of Pṛthā मां Me पुरोधसां of the priests मुख्यं the chief बृहस्पतिम् Bṛhaspati च and विद्धि know अहं I सेनानीनाम् of generals स्कन्दः Skanda सरसाम् of bodies of water सागरः the ocean अस्मि (I) am.

24. And of priests, O son of Pṛthā, know Me the chief, Bṛhaspati; of generals, I am Skanda; of bodies of water, I am the ocean.

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ॥
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥२५॥

अहं I महर्षीणां of the great *Ṛṣis* भृगुः Bhṛgu गिराम् of words एकम् one अक्षरम् the syllable "Om" अस्मि (I) am यज्ञानां of *Yajñas* जपयज्ञः the *Yajña* of *Japa* (silent repetition) स्थावराणां of immovable things हिमालयः the Himālaya अस्मि (I) am.

25. Of the great *Ṛṣis* I am Bhṛgu; of words I am the one syllable "Om"; of *Yajñas* I am the *Yajña* of *Japa* (silent repetition); of immovable things the Himālaya.

*Yajña of Japa*: because there is no injury or loss of life involved in it, it is the best of all *Yajñas*.

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥२६॥

सर्ववृक्षाणां Of all trees अश्वत्थः the Aśvattha देवर्षीणां of the *Deva-Ṛṣis* च and नारदः Nārada गन्धर्वाणां of *Gandharvas* चित्ररथः Citraratha सिद्धानां of the perfected ones कपिलः Kapila मुनिः the *Muni*.

26. Of all trees (I am) the Aśvattha, and Nārada of *Deva-Ṛṣis*; Citraratha of *Gandharvas* am I, and the *Muni* Kapila of the perfected ones.

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ।।२७।।

अश्वानां Among horses अमृतोद्भवम् *Amṛta*-born उच्चैः-श्रवसम् Uccaiśravas गजेन्द्राणां of lordly elephants ऐरावतं Airāvata नराणां of men नराधिपम् the king च and माम् Me विद्धि know.

27. Know Me among horses as Uccaiśravas, *Amṛta*-born; of lordly elephants Airāvata, and of men the king.

*Amṛta-born*: Brought forth from the ocean when it was churned for the nectar.

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ।।२८।।

आयुधानाम् Of weapons अहं I वज्रं the thunderbolt धेनूनाम् of cows कामधुक् *Kāmadhuk* (Surabhi, the heavenly cow yielding all desires) अस्मि (I) am (अहं I) प्रजनः cause of offspring कन्दर्पः Kandarpa च and अस्मि (I) am सर्पाणाम् of serpents वासुकिः Vāsuki अस्मि (I) am.

28. Of weapons I am the thunderbolt, of cows I am *Kāmadhuk*; I am the Kandarpa, the cause of offspring; of serpents I am Vāsuki.

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ।।२९।।

नागानां Of snakes अनन्तः Ananta च and अस्मि (I) am यादसाम् of water-beings अहम् I (अस्मि am) वरुणः Varuṇa पितृणाम् of *Pitṛs* अर्यमा Aryaman च and अस्मि (I) am संयमताम् of controllers अहम् I यमः Yama (अस्मि I am).

29. And Ananta of snakes I am, I am Varuṇa of water-beings; and Aryaman of *Pitṛs* I am, I am Yama of controllers.

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ।।३०।।

दैत्यानां Of Diti's progeny च and प्रह्लादः Prahlāda अस्मि (I) am कलयताम् of measurers अहम् I कालः Time (अस्मि I am) मृगाणां of beasts अहं I च and मृगेन्द्रः the lord of beasts (lion) पक्षिणाम् of birds वैनतेयः son of Vinatā, Garuḍa च and.

30. And Prahlāda am I of Diti's progeny, of measurers I am Time; and of beasts I am the lord of beasts; and Garuḍa of birds.

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ।।३१।।

पवताम् Of purifiers पवनः the wind अस्मि (I) am शस्त्रभृताम् of wielders of weapons (warriors) अहम् I रामः Rāma (अस्मि I am) झषाणां of fishes मकरः *Makara* (shark)

च and अस्मि (I) am स्रोतसाम् of streams जाह्नवी Jāhnavī, Gaṅgā अस्मि (I) am.

31. Of purifiers I am the wind, Rāma of warriors am I; of fishes I am the shark, of streams I am Jāhnavī (the Gaṅgā).

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ।।३२।।

अर्जुन O Arjuna सर्गाणाम् of manifestations आदिः the beginning च and अन्तः the end मध्यं the middle च and अहम् I एव also विद्यानां of all knowledges अध्यात्मविद्या the knowledge of the Self प्रवदताम् of disputants (च and) अहम् I वादः *Vāda.*

32. Of manifestations I am the beginning, the middle and also the end; of all knowledges I am the knowledge of the Self, and *Vāda* of disputants.

*Vāda*: Discussion is classified under three heads: 1. *Vāda*; 2. *Vitaṇḍā*; 3. *Jalpa*.

In the first, the object is to arrive at truth; in the second, idle carping at the arguments of another, without trying to establish the opposite side of the question; and in the third, the assertion of one's own opinion, and the attempt to refute that of the adversary by overbearing reply or wrangling rejoinder.

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ।।३३।।

अक्षराणाम् Of letters अकार: the letter A अस्मि (I) am सामासिकस्य of all compounds च and द्वन्द्व: (that called in Sanskrit) *Dvandva*, the copulative अहम् I एव alone अक्षय: the inexhaustible काल: Time अहं I विश्वतोमुख: the All-formed धाता the Sustainer (by distributing fruits of actions).

33. Of letters the letter A am I, and *Dvandva* of all compounds; I alone am the inexhaustible Time, I the Sustainer (by dispensing fruits of actions) All-formed.

*Inexhaustible Time*: i.e., Eternity. *Kāla* spoken of before is finite time.

मृत्यु: सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्ति: श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृति:
क्षमा ॥३४॥

अहम् I सर्वहर: the all-seizing मृत्यु: Death च and भविष्यताम् of those who are to be prosperous उद्भव: the prosperity च and नारीणां of the feminine कीर्ति: Fame श्री: Prosperity (or beauty) वाक् Inspiration (lit. speech) स्मृति: Memory मेधा Intelligence धृति: Constancy क्षमा Forbearance च and (अहम् I).

34. And I am the all-seizing Death, and the prosperity of those who are to be prosperous; of the feminine qualities (I am)

Fame, Prosperity (or beauty), Inspiration, Memory, Intelligence, Constancy and Forbearance.

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ।।३५।।

अहम् I तथा also साम्नां of *Sāma* hymns बृहत्साम *Bṛhat-Sāma* छन्दसाम् of metres अहम् I गायत्री *Gāyatrī* मासानां of months मार्गशीर्षः *Mārgaśīrṣa* ऋतूनां of seasons कुसुमाकरः ths flowery season.

35. Of *Sāmas* also I am the *Bṛhat-Sāma*, of metres *Gāyatrī* am I; of months I am *Mārgaśīrṣa*, of seasons the flowery season.

*Mārgaśīrṣa*: month including parts of November and December.

*Flowery season*: Spring.

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्
।।३६।।

अहम् I छलयताम् of the fraudulent द्यूतं the gambling तेजस्विनाम् of the powerful तेजः power अस्मि (I) am अहम् I जयः victory अस्मि (I) am व्यवसायः effort अस्मि (I) am सत्त्ववताम् of the *Sāttvika* सत्त्वं the *Sattva* (अस्मि I am).

36. I am the gambling of the fraudulent,

I am the power of the powerful; I am victory, I am effort, I am *Sattva* of the *Sāttvika*.

*I am victory, I am effort*: I am victory of the victorious, I am the effort of those who make an effort.

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ॥
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥

अहं I वृष्णीनां of the Vṛṣṇīs वासुदेवः Vāsudeva पाण्डवानां of the Pāṇḍavas धनञ्जयः Dhanañjaya अपि also मुनीनाम् of the *Munis* व्यासः Vyāsa कवीनाम् of the sages उशना Uśanas कविः the sage अस्मि (I) am.

37. Of the Vṛṣṇīs I am Vāsudeva; of the Pāṇḍavas, Dhanañjaya; and also of the *Munis* I am Vyāsa; of the sages, Uśanas the sage.

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ॥
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥३८॥

अहम् I दमयताम् of punishers दण्डः the sceptre अस्मि (I) am जिगीषताम् of those who seek to conquer नीतिः statesmanship अस्मि (I) am गुह्यानां of things secret मौनं silence च एव and also अस्मि (I) am ज्ञानवताम् of knowers ज्ञानं the knowledge.

38. Of punishers I am the sceptre; of those who seek to conquer, I am statesmanship; and also of things secret I am silence, and the knowledge of knowers am I.

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ।।३९।।

अर्जुन O Arjuna यत् what च and सर्वभूतानां of all beings बीजं the seed तत् that अहम् I अपि also मया विना without Me यत् what स्यात् can exist तत् that चराचरम् moving or unmoving भूतं being न अस्ति there is not.

39. And whatsoever is the seed of all beings, that also am I, O Arjuna. There is no being, whether moving or unmoving, that can exist without Me.

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ।।४०।।

परन्तप O scorcher of foes मम My दिव्यानां of divine विभूतीनां attributes अन्तः end न not अस्ति is एषः this तु but विभूतेः of attributes विस्तरः particulars मया by Me उद्देशतः brief statement प्रोक्तः has been stated.

40. There is no end of My divine attributes, O scorcher of foes; but this is a brief statement by Me of the particulars of My divine attributes.

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ।।४१।।

विभूतिमत् Great श्रीमत् prosperous वा or एव also ऊर्जितम् powerful यत् यत् whatever सत्त्वं being तत् तत् that एव also मम My तेजोंऽशसम्भवम् a product of a part of splendour त्वं thou अवगच्छ know.

41. Whatever being there is great, prosperous, or powerful, that know thou to be a product of a part of My splendour.

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।।४२।।

अथवा Or अर्जुन O Arjuna एतेन by this बहुना (by) many ज्ञातेन to know तव thy किं what (avails) अहम् I इदं this कृत्स्नम् whole जगत् world एकांशेन by a portion विष्टभ्य supporting स्थितः exist.

42. Or what avails thee to know all this diversity, O Arjuna? (Know thou this that) I exist, supporting this whole world by a portion of Myself.

इति विभूतियोगो नाम दशमोऽध्यायः ।।

The end of the tenth chapter, designated, *Glimpses of the Divine Glory.*

## ॥ एकादशोऽध्याय: ॥

## ELEVENTH CHAPTER

अर्जुन उवाच ।

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ॥
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥

अर्जुन: Arjuna उवाच said:

मदनुग्रहाय Out of compassion towards me परमं supremely गुह्यम् profound अध्यात्मसंज्ञितम् that which treats of the discrimination of Self and non-Self यत् that वच: words त्वया by Thee उक्तं spoken तेन by that मम my अयं this मोह: delusion विगत: is gone.

Arjuna said:

1. By the supremely profound words, on the discrimination of Self, that have been spoken by Thee out of compassion towards me, this my delusion is gone.

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥
त्वत्त: कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥

कमलपत्राक्ष O Thou with eyes like the lotus-leaf त्वत्त: of Thee भूतानां of beings भवाप्ययौ the origin and

dissolution मया by me विस्तरशः at length हि indeed श्रुतौ have been heard अव्ययम् inexhaustible माहात्म्यम् greatness अपि च and also.

2. Of Thee, O lotus-eyed, I have heard at length, of the origin and dissolution of beings, as also Thy inexhaustible greatness.

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ।।३।।

परमेश्वर O Supreme Lord यथा as त्वम् Thou आत्मानं Thyself आत्थ hast declared एतत् it एवम् so पुरुषोत्तम O Supreme *Puruṣa* ते Thy ऐश्वरं रूपम् *Īśvara*-Form द्रष्टुम् to see इच्छामि (I) desire.

3. So it is, O Supreme Lord! as Thou hast declared Thyself. (Still) I desire to see Thy *Īśvara*-Form, O Supreme *Puruṣa*.

*Thy Īśvara-Form*: as possessed of omnipotence, omnipresence, infinite wisdom, strength, virtue, and splendour.

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ।।४।।

प्रभो O Lord यदि if तत् that मया by me द्रष्टुम् to see शक्यं capable इति as मन्यसे Thou thinkest ततः then योगेश्वर O Lord of Yogis त्वं Thou मे me अव्ययम् immutable आत्मानम् Self दर्शय show.

4. If, O Lord, Thou thinkest me capable of seeing it, then, O Lord of Yogis, show me Thy immutable Self.

श्रीभगवानुवाच ।
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ।।५।।

श्रीभगवान् The Blessed Lord उवाच said:

पार्थ O son of Pṛthā मे My दिव्यानि celestial नानाविधानि different in kind नानावर्णाकृतीनि of various colours and shapes च and शतशः by the hundred अथ and सहस्रशः by the thousand रूपाणि forms पश्य behold.

The Blessed Lord said:

5. Behold, O son of Pṛthā, by hundreds and thousands, My different forms celestial, of various colours and shapes.

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा ।।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ।।६।।

भारत O descendant of Bharata आदित्यान् the (twelve) *Ādityas* वसून् the (eight) *Vasus* रुद्रान् the (eleven) *Rudras* अश्विनौ the twin *Aśvins* तथा also मरुतः the *Maruts* (the forty-nine wind-gods) पश्य behold बहूनि many अदृष्टपूर्वाणि never seen before आश्चर्याणि wonders पश्य behold.

6. Behold the *Ādityas*, the *Vasus*, the *Rudras*, the twin *Aśvins*, and the *Maruts*; behold, O descendant of Bharata, many wonders never seen before.

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ।।७।।

गुडाकेश O Guḍākeśa (Arjuna) इह this मम My देहे (in) body एकस्थं centred in one कृत्स्नं whole सचराचरम् with the moving and the unmoving जगत् universe अन्यत् else च and यत् that द्रष्टुम् to see इच्छसि (thou) desirest अद्य now पश्य see.

7. See now, O Guḍākeśa, in this My body, the whole universe centered in one—including the moving and the unmoving—and all else that thou desirest to see.

*Centred in one*: as part of My body.

*All else*: e.g., your success or defeat in the war about which you entertain a doubt (II. 6).

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ।।८।।

अनेनैव With this स्वचक्षुषा with eye of thine तु but मां Me द्रष्टुम् to see न शक्यसे thou canst not ते (to) thee दिव्यं divine, supersensuous चक्षुः sight ददामि (I) give मे My ऐश्वरम् Supreme योगम् Yoga Power पश्य behold.

8. But thou canst not see Me with these eyes of thine; I give thee supersensuous sight; behold My supreme Yoga power.

*Me*: in My Universal Form.

सञ्जय उवाच ।
एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ।।९।।

सञ्जयः Sañjaya उवाच said:

राजन् O King (Dhṛtarāṣṭra) महायोगेश्वरः the Great Lord of Yoga हरिः Hari एवम् thus उक्त्वा having spoken ततः then पार्थाय unto the son of Pṛthā परमं Supreme ऐश्वरम् रूपम् *Īśvara*-Form दर्शयामास showed.

Sañjaya said:

9. Having thus spoken, O King, Hari, the Great Lord of Yoga, showed unto the son of Pṛthā, His Supreme *Īśvara*-Form:

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ।।१०।।

अनेकवक्त्रनयनम् With numerous mouths and eyes अनेकाद्भुतदर्शनम् with numerous wondrous sight अनेकदिव्याभरणं with numerous celestial ornaments दिव्यानेकोद्यतायुधम् with numerous celestial weapons uplifted.

10. With numerous mouths and eyes, with numerous wondrous sights, with numerous celestial ornaments, with numerous celestial weapons uplifted;

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ।।११।।

दिव्यमाल्याम्बरधरं Wearing celestial garlands and apparel दिव्यगन्धानुलेपनम् anointed with celestial-scented unguents सर्वाश्चर्यमयं the All-wonderful देवम् Resplendent अनन्तं Boundless विश्वतोमुखम् All-formed.

11. Wearing celestial garlands and apparel, anointed with celestial-scented unguents, the All-wonderful Resplendent, Boundless, and All-formed.

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।।
यदि भा: सदृशी सा स्याद्भासस्तस्य महात्मनः।।१२।।

दिवि In the sky यदि if सूर्यसहस्रस्य of a thousand suns भा: splendour युगपत् at once उत्थिता भवेत् were to rise up सा that तस्य of that महात्मन: of the Mighty Being भासः splendour सदृशी like स्यात् would be.

12. If the splendour of a thousand suns were to rise up simultaneously in the sky, that would be like the splendour of that Mighty Being.

*Mighty Being*: The Universal Form.

The splendour of the Universal Form excels all others; it is indeed beyond compare.

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ।।१३।।

तदा Then पाण्डव: the son of Pāṇḍu तत्र there देवदेवस्य of the God of gods शरीरे in the body अनेकधा in manifold ways प्रविभक्तम् divided कृत्स्नं whole जगत् universe एकस्थं resting in one अपश्यत् saw.

13. There in the body of the God of gods, the son of Pāṇḍu then saw the whole universe resting in one, with its manifold divisions.

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ।।१४।।

ततः Then सः he धनञ्जयः Dhanañjaya विस्मयाविष्टः filled with wonder हृष्टरोमा with hairs standing on end देवं to the *Deva* शिरसा with (his) head प्रणम्य bending कृताञ्जलिः with joined palms अभाषत spoke.

14. Then Dhanañjaya, filled with wonder, with his hairs standing on end, bending down his head to the *Deva* in adoration, spoke with joined palms.

*Deva*: God, in His Universal Form.

अर्जुन उवाच ।
पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ।।१५।।

अर्जुनः Arjuna उवाच said:

देव O *Deva* तव Thy देहे in the body सर्वान् all देवान् the *Devas* तथा and भूतविशेषसङ्घान् hosts of all grades of beings ईशं the Lord कमलासनस्थम् seated on the lotus ब्रह्माणम् Brahmā ऋषीन् *Ṛṣis* च and सर्वान् all दिव्यान् celestial उरगान् serpents च and पश्यामि (I) see.

Arjuna said:

15. I see all the *Devas*, O *Deva*, in Thy body, and hosts of all grades of beings; Brahmā, the Lord, seated on the lotus, and all the *Ṛṣis* and celestial serpents.

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूपम् ।।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ।।१६।।

विश्वेश्वर O Lord of the universe विश्वरूप O Universal Form अनेकबाहूदरवक्त्रनेत्रं with manifold arms, stomachs

mouths, and eyes अनन्तरूपम् of boundless form त्वां Thee सर्वत: on every side पश्यामि (I) see तव of Thee पुन: also न neither अन्तं the end न nor मध्यं the middle न nor आदिं the beginning पश्यामि do (I) see.

16. I see Thee of boundless form on every side with manifold arms, stomachs, mouths, and eyes; neither the end nor the middle, nor also the beginning of Thee do I see, O Lord of the universe, O Universal Form.

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्-
दीप्तानलार्कद्युतिमप्रमेयम् ।।१७।।

किरीटिनं One with diadem गदिनं with club चक्रिणं with discus च and सर्वत: everywhere दीप्तिमन्तम् shining तेजोराशिं a mass of radiance दुर्निरीक्ष्यं very hard to look at दीप्तानलार्कद्युतिम् blazing like burning fire and sun अप्रमेयम् immeasurable त्वां Thee समन्तात् all around पश्यामि (I) see.

17. I see Thee with diadem, club, and discus; a mass of radiance shining everywhere, very hard to look at, all around blazing like burning fire and sun, and immeasurable.

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ।।१८।।

त्वम् Thou अक्षरं the Imperishable परमं the Supreme Being वेदितव्यं the one thing to be known त्वम् Thou अस्य विश्वस्य of this universe परं the great निधानम् Refuge त्वम् Thou अव्ययः the undying शाश्वतधर्मगोप्ता Guardian of the Eternal Dharma त्वं Thou सनातनः the Ancient पुरुषः *Puruṣa* मे मतः I ween.

18. Thou art the Imperishable, the Supreme Being, the one thing to be known. Thou art the great Refuge of this universe; Thou art the undying Guardian of the Eternal Dharma, Thou art the Ancient *Puruṣa*, I ween.

अनादिमध्यान्तमनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम् ।।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ।।१९।।

अनादिमध्यान्तम् Without beginning, middle, or end अनन्तवीर्यम् infinite in power अनन्तबाहुं of manifold arms शशिसूर्यनेत्रम् the sun and the moon (Thy) eyes दीप्तहुताश-

वक्त्रं the burning fire (Thy) mouth स्वतेजसा with Thy radiance इदं this विश्वम् universe तपन्तम् heating त्वां Thee पश्यामि (I) see.

19. I see Thee without beginning, middle, or end, infinite in power, of manifold arms; the sun and the moon Thine eyes, the burning fire Thy mouth; heating the whole universe with Thy radiance.

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥

महात्मन् O Great-souled One द्यावापृथिव्योः (of) heaven and earth इदम् this अन्तरं space betwixt एकेन alone त्वया by Thee हि indeed व्याप्तं are filled सर्वाः all दिशः quarters च and तव Thy अद्भुतं wonderful इदं this उग्रं awful रूपम् form दृष्ट्वा having seen लोकत्रयं the three worlds प्रव्यथितं are trembling (with fear).

20. This space betwixt heaven and earth and all the quarters are filled by Thee alone; having seen this, Thy marvellous and awful Form, the three worlds are trembling with fear, O Great-souled One.

अमी हि त्वां सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ।।२१।।

अमी These सुरसङ्घाः hosts of *Devas* हि verily त्वां Thee विशन्ति enter केचित् some भीताः in fear प्राञ्जलयः with joined palms गृणन्ति extol महर्षिसिद्धसङ्घाः bands of great *Ṛṣis* and *Siddhas* "स्वस्ति" "May it be well" इति thus उक्त्वा saying पुष्कलाभिः splendid स्तुतिभिः with hymns त्वां Thee स्तुवन्ति praise.

21. Verily, into Thee enter these hosts of *Devas*; some extol Thee in fear with joined palms; "May it be well!" thus saying, bands of great *Ṛṣis* and *Siddhas* praise Thee with splendid hymns.

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।।
गन्धर्वयक्षासुरसिद्धसङ्घा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ।।२२।।

रुद्रादित्याः The *Rudras* and *Ādityas* वसवः *Vasus* ये those that च and साध्याः *Sādhyas* विश्वे *Viśva-Devas* अश्विनौ the two *Aśvins* मरुतः *Maruts* च and उष्मपाः

*Uṣmapās* च and गन्धर्वयक्षासुरसिद्धसङ्घाः hosts of *Gandharvas, Yakṣas. Asuras* and *Siddhas* सर्वे all विस्मिताः एव quite astounded त्वां Thee च and वीक्षन्ते are looking at.

22. The *Rudras, Ādityas, Vasus, Sādhyas, Viśva-Devas*, the two *Aśvins, Maruts, Uṣmapās*, and hosts of *Gandharvas, Yakṣas, Asuras*, and *Siddhas*—all these are looking at Thee, all quite astounded.

*Uṣmapās*: *The Pitṛs.*

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥२३॥

महाबाहो O mighty-armed बहुवक्त्रनेत्रं with many mouths and eyes बहुबाहूरुपादम् with many arms, thighs, and feet बहूदरं with many stomachs बहूदंष्ट्राकरालं fearful with many tusks ते Thy महत् immeasurable रूपं Form दृष्ट्वा having seen लोकाः worlds प्रव्यथिताः are terrified अहम् I तथा so also.

23. Having seen Thy immeasurable Form—with many mouths and eyes, O mighty-armed, with many arms, thighs, and feet, with many stomachs, and fearful with many tusks—the worlds are terrified, and so am I.

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ।।२४।।

विष्णो O Viṣṇu नभःस्पृशं touching the sky दीप्तम् shining अनेकवर्णं in many a colour व्यात्ताननं with mouths wide open दीप्तविशालनेत्रम् with large fiery eyes त्वां Thec हि indeed दृष्ट्वा on seeing प्रव्यथितान्तरात्मा terrified at heart (अहं I) धृतिं patience, courage शमं peace च and न not विन्दामि find.

24. On seeing Thee touching the sky, shining in many a colour, with mouths wide open, with large fiery eyes, I am terrified at heart, and find no courage nor peace, O Viṣṇu.

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि ।।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ।।२५।।

देवेश O Lord of *Devas* दंष्ट्राकरालानि fearful with tusks कालानलसन्निभानि (blazing) like *Pralaya*-fires च and ते Thy मुखानि mouths दृष्ट्वा एव having seen दिशः the four quarters न जाने I know not शर्म peace न च nor लभे do (I) find

जगन्निवास O Abode of the universe प्रसीद have mercy.

25. Having seen Thy mouths, fearful with tusks, (blazing) like *Pralaya*-fires, I know not the four quarters, nor do I find peace; have mercy, O Lord of the *Devas*, O Abode of the universe.

*Pralaya-fires*: The fires which consume the worlds at the time of the final dissolution (*Pralaya*) of the universe.

*I know . . . quarters*: I cannot distinguish the East from the West, nor the North from the South.

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसङ्घैः ॥
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः ॥२६॥
वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ॥
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥२७॥

अवनिपालसङ्घैः Hosts of kings of the earth सहैव with अमी those च and धृतराष्ट्रस्य of Dhṛtarāṣṭra सर्वे all पुत्राः sons तथा and भीष्मः Bhīṣma द्रोणः Droṇa असौ that सूतपुत्रः Sūtaputra अस्मदीयैः (with those) of ours अपि also योधमुख्यैः (with) warrior chiefs सह with त्वरमाणाः precipitately ते

Thy दंष्ट्राकरालानि terrible with tusks भयानकानि fearful to behold वक्त्राणि mouths त्वां Thee विशन्ति enter केचित् some चूर्णितैः crushed to powder उत्तमाङ्गैः with (their) heads दशनान्तरेषु in the gaps betwixt the teeth विलग्नाः sticking संदृश्यन्ते are found.

26-27. All those sons of Dhṛtarāṣṭra, with hosts of monarchs, Bhīṣma, Droṇa and Sūtaputra, with the warrior chiefs of ours, enter precipitately into Thy mouth, terrible with tusks and fearful to behold. Some are found sticking in the interstices of Thy teeth, with their heads crushed to powder.

*Sūtaputra*: The son of a charioteer, Karṇa.

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ॥
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥२८॥

यथा As नदीनां of rivers बहवः many अम्बुवेगाः water-currents अभिमुखाः towards समुद्रम् the ocean एव verily द्रवन्ति flow तथा so अमी those नरलोकवीराः heroes in the world of men अभिविज्वलन्ति fiercely flaming तव Thy वक्त्राणि mouths विशन्ति enter.

28. Verily, as the many torrents of rivers flow towards the ocean, so do those heroes in

the world of men enter Thy fiercely flaming mouths.

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः ।।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः ।।२९।।

यथा As पतङ्गाः moths समृद्धवेगाः with precipitous speed नाशाय to perish प्रदीप्तं blazing ज्वलनं fire विशन्ति rush into तथा just so समृद्धवेगाः with precipitous speed लोकाः creatures अपि also नाशाय to perish एव only तव Thy वक्त्राणि mouths विशन्ति rush into.

29. As moths precipitately rush into a blazing fire only to perish, even so do these creatures also precipitately rush into Thy mouths only to perish.

28 and 29—The two similes vividly illustrate how the assembled warriors rush to destruction, out of their uncontrollable nature, with or without discrimination.

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ।।३०।।

ज्वलद्भिः Flaming वदनैः with mouths समग्रान् all लोकान् the worlds ग्रसमानः swallowing समन्तात् on every side लेलिह्यसे Thou art licking Thy lips विष्णो O Viṣṇu तव Thy उग्राः fierce भासः rays तेजोभिः with radiance समग्रं the whole जगत् world आपूर्य filling प्रतपन्ति are burning.

30. Swallowing all the worlds on every side with Thy flaming mouths, Thou art licking Thy lips. Thy fierce rays, filling the whole world with radiance, are burning O Viṣṇu!

*Licking Thy lips*: consuming entirely, enjoying it, as it were.

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ॥
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥३१॥

उग्ररूपः Fierce in form भवान् Thou कः who (art) मे me आख्याहि tell ते to Thee नमः salutation अस्तु be देववर O Supreme *Deva* प्रसीद have mercy आद्यं the Primeval One भवन्तम् Thee विज्ञातुम् to know इच्छामि (I) desire हि indeed तव Thy प्रवृत्तिं purpose न not प्रजानामि (I) know.

31. Tell me who Thou art, fierce in form. Salutation to Thee, O Supreme *Deva*! have mercy. I desire to know Thee, O Primeval One. I know not indeed Thy purpose.

श्रीभगवानुवाच ।
कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ।।३२।।

श्रीभगवान् The Blessed Lord उवाच said:

लोकक्षयकृत् World-destroying प्रवृद्धः mighty कालः Time अस्मि (I) am लोकान् world समाहर्तुम् to infold इह here प्रवृत्तः engaged त्वां thee ऋते without अपि even प्रत्यनीकेषु in hostile armies ये these योधाः warriors अवस्थिताः arrayed सर्वे न none भविष्यन्ति shall live.

The Blessed Lord said:

32. I am the mighty world-destroying Time, here made manifest for the purpose of infolding the world. Even without thee, none of the warriors arrayed in the hostile armies shall live.

*Even without thee, etc.*: Even without thy instrumentality, i.e., even if, thou, O Arjuna, wouldst not fight, the end of all these warriors is inevitable, because I as the all-destroying Time have already killed them; so thy instrumentality in that work is insignificant.

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।।

मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥३३॥

तस्मात् Therefore त्वम् thou उत्तिष्ठ do arise यशः fame लभस्व acquire शत्रून् enemies जित्वा after conquering समृद्धम् the unrivalled राज्यं dominion भुङ्क्ष्व enjoy मया by Myself एव verily एते they पूर्वम् already एव even निहताः have been slain सव्यसाचिन् O Savyasācin (त्वं thou) निमित्तमात्रं an apparent cause भव be.

33. Therefore do thou arise and acquire fame. Conquer the enemies, and enjoy the unrivalled dominion. Verily by Myself have they been already slain; be thou merely an apparent cause, O Savyasācin (Arjuna).

*Be thou . . . cause*: People will think thee as the vanquisher of thy enemies, whom even the Devas cannot kill, and thus thou wilt gain glory; but thou art only an instrument in My hand.

*Savyasācin*: one who could shoot arrows even with his left hand.

द्रोणञ्च भीष्मञ्च जयद्रथञ्च
कर्णं तथान्यानपि योधवीरान्
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥३४॥

द्रोणं Droṇa च and भीष्मं Bhīṣma च and जयद्रथं Jayadratha च and कर्णं Karṇa तथा as well as अन्यान् others

योधवीरान् brave warriors अपि already मया by Me हतान् killed त्वं thou जहि do kill मा not व्यथिष्ठा: be distressed with fear रणे in battle सपत्नान् the enemies जेतासि shalt conquer युध्यस्व fight.

34. Droṇa, Bhīṣma, Jayadratha, Karṇa as well as other brave warriors—these already killed by Me, do thou kill. Be not distressed with fear; fight, and thou shalt conquer thy enemies in battle.

*Already killed by Me*: so do not be afraid of incurring sin by killing Droṇa, Bhīṣma, and others though they are venerable to you as your Guru, grandsire, etc.

*Distressed with fear*: as regards success because these great warriors are regarded as invincible.

सञ्जय उवाच ।

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमान: किरीटी ।।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीत: प्रणम्य ।।३५।।

सञ्जय: Sañjaya उवाच said:

केशवस्य Of Keśava एतत् this वचनं speech श्रुत्वा having heard वेपमान: trembling किरीटी the diademed one कृताञ्जलि: with joined palms नमस्कृत्वा prostrating (himself) भीतभीत: overwhelmed with fear प्रणम्य bowing

down भूयः एवं again सगद्गदं in a choked voice कृष्णं to Kṛṣṇa आह addressed.

Sañjaya said:

35. Having heard this speech of Keśava, the diademed one (Arjuna), with joined palms, trembling, prostrated himself, and again addressed Kṛṣṇa in a choked voice, bowing down, overwhelmed with fear.

अर्जुन उवाच ।

स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥३६॥

अर्जुनः Arjuna उवाच said:

हृषीकेश O Hṛṣīkeśa तव Thy प्रकीर्त्या in praise जगत् the world प्रहृष्यति is delighted अनुरज्यते rejoices च and रक्षांसि *Rākṣasas* भीतानि in fear दिशः to all quarters द्रवन्ति fly सर्वे all सिद्धसङ्घाः the hosts of *Siddhas* च and नमस्यन्ति bow (to Thee) स्थाने it is meet.

Arjuna said:

36. It is meet, O Hṛṣīkeśa, that the world is delighted and rejoices in Thy praise, that *Rākṣasas* fly in fear to all quarters and all

the hosts of *Siddhas* bow down to Thee in adoration.

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ।।३७।।

महात्मन् O Great-souled One अनन्त O Infinite देवेश O Lord of the *Devas* जगन्निवास O Abode of the universe ब्रह्मण: of Brahmā अपि even गरीयसे greater आदिकर्त्रे the Primal Cause च and ते to Thee कस्मात् why न not नमेरन् they should bow सत् the Being असत् the non-Being परं Beyond (them) यत् which अक्षरं the Imperishable तत् That च and त्वम् Thou (art).

37. And why should they not, O Great-souled One, bow to Thee, greater than, and the Primal Cause of even Brahmā, O Infinite Being, O Lord of the *Devas*, O Abode of the universe? Thou art the Imperishable, the Being and the non-Being, (as well as) That which is Beyond (them).

*Brahmā*: the *Hiraṇyagarbha*.

*The Being and the non-Being, etc.*: The *Sat* (manifested) and the *Asat* (unmanifested), which form the *Upādhis* (adjuncts) of the *Akṣara* (Imperishable); as such He is spoken of as the *Sat* and the *Asat*. In reality, the Imperishable transcends the *Sat* and the *Asat*.

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ॥
वेत्ताऽसि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥३८॥

अनन्तरूप O boundless Form त्वम् Thou आदिदेवः the Primal *Deva* पुराणः the Ancient पुरुषः *Puruṣa* त्वम् Thou अस्य विश्वस्य of this universe परं the Supreme निधानम् Refuge वेत्ता the Knower च and वेद्यं the One Thing to be known च and परं the Supreme धाम Goal असि (Thou) art त्वया by Thee विश्वम् the universe ततं is pervaded.

38. Thou art the Primal *Deva*, the Ancient *Puruṣa*; Thou art the Supreme Refuge of this universe, Thou art the Knower, and the One Thing to be known; Thou art the Supreme Goal. By Thee is the universe pervaded, O boundless Form.

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ॥
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥३९॥

त्वं Thou (art) वायुः Vāyu यमः Yama अग्निः Agni वरुणः Varuṇa शशाङ्कः the Moon प्रजापतिः Prajāpati प्रपितामहः

the Great-grandfather च and ते to Thee नमः नमः salutation, salutation अस्तु be सहस्रकृत्वः a thousand times पुनः again च and भूयः अपि and again ते to Thee नमः नमः salutation, salutation.

39. Thou art Vāyu, Yama, Agni, Varuṇa the Moon, Prajāpati, and the Great-grandfather. Salutation, salutation to Thee, a thousand times, and again and again salutation, salutation to Thee!

*Vāyu . . . Moon*: The gods of wind, death, fire, waters, and the moon.

*The Great-grandfather*: The creator even of Brahmā who is known as the Grandfather.

नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व ।।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ।।४०।।

सर्व O All ते to Thee पुरस्तात् before अथ and पृष्ठतः behind नमः salutation ते to Thee सर्वतः एव on every side नमः salutation अस्तु be अनन्तवीर्या infinite in power अमितविक्रमः infinite in prowess त्वं Thou सर्वं all समाप्नोषि pervadest ततः wherefore सर्वः all असि Thou art.

40. Salutation to Thee before and behind, salutation to Thee on every side, O All! Thou,

infinite in power and infinite in prowess, pervadest all; wherefore Thou art All.

*On every side*: As Thou art present everywhere.
*Pervadest*: by thy One Self.

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ।।४१।।
यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।।
एकोऽथवाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ।।४२।।

तव Thy महिमानं greatness इदं this च and अजानता unconscious of मया by me प्रमादात् from carelessness प्रणयेन due to love वा or अपि merely सखा friend इति as मत्वा regarding हे कृष्ण O Kṛṣṇa हे यादव O Yādava हे सखे O friend इति as प्रसभं presumptuously यत् whatever उक्तं said अच्युत O Acyuta विहारशय्यासनभोजनेषु while walking, reposing, sitting, or at meals एकः when alone अथवा or अपि even तत्समक्षं in company अवहासार्थम् for the sake of fun यत् in whatever way असत्कृतः disrespectfully treated असि Thou art अहम् I अप्रमेयम् Immeasurable त्वाम् Thee तत् that क्षामये implore to forgive.

41-42. Whatever I have presumptuously said from carelessness or love, addressing Thee as "O Kṛṣṇa, O Yādava, O friend" regarding Thee merely as a friend, unconscious of this Thy greatness — in whatever way I may have been disrespectful to Thee in fun, while walking, reposing, sitting, or at meals, when alone (with Thee), O Acyuta, or in company— I implore Thee, Immeasurable One, to forgive all this.

*Love*: Confidence born of affection.
*In company*: in the presence of others.

पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ।।४३।।

अप्रतिमप्रभाव Of power incomparable त्वम् Thou चराचरस्य moving and unmoving लोकस्य of the world पिता Father असि (Thou) art पूज्यः the object of worship अस्य its च and गुरुर्गरीयान् greater than the great लोकत्रये in the three worlds अपि even त्वत्समः equal to Thee न not अस्ति is अभ्यधिकः surpassing अन्यः any other कुतः whence.

43. Thou art the Father of the world, moving and unmoving; the object of its

worship; greater than the great. None there exists who is equal to Thee in the three worlds; who then can excel Thee, O Thou of power incomparable?

*None . . . to Thee*: There cannot be two or more *Īśvaras*; if there were, the world could not get on as it does. When one *Īśvara* desires to create, another may desire to destroy. Who knows that all the different *Īśvaras* would be of one mind, as they would all be independent of each other?

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ॥
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥

देव O *Deva* तस्मात् so अहम् I कायं (my) body प्रणिधाय having prostrated प्रणम्य saluting ईड्यम् adorable ईशम् Lord त्वाम् Thee प्रसादये crave forgiveness पुत्रस्य of the son पिता a father इव as सख्युः of a dear friend सखा a friend इव as प्रियायाः of one's love प्रियः a beloved one (इव as) सोढुम् to forgive अर्हसि Thou shouldest.

44. So prostrating my body in adoration, I crave Thy forgiveness, Lord adorable! As a father forgiveth his son, friend a dear friend, a beloved one his love, even so shouldst Thou forgive me, O *Deva*.

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ।।४५।।

देव O *Deva* अदृष्टपूर्वं what was never seen before दृष्ट्वा having seen हृषितः overjoyed अस्मि I am भयेन with terror च yet मे my मनः mind प्रव्यथितं is distracted तत् that रूपं Form एव only मे me दर्शय show देवेश O Lord of *Devas* जगन्निवास O Abode of the universe प्रसीद have mercy.

45. Overjoyed am I to have seen what I saw never before; yet mind is distracted with terror. Show me, O *Deva*, only that Form of Thine. Have merey, O Lord of *Devas*, O Abode of the universe.

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ।।४६।।

अहं I तथा एव as before त्वां Thee किरीटिनं diademed गदिनं bearing a mace चक्रहस्तम् with a discus in the hand द्रष्टुम् to see इच्छामि I desire सहस्रबाहो O (Thou) of thousand

arms विश्वमूर्ते of universal Form तेनैव that same चतुर्भुजेन four-armed रूपेण of Form भव be.

46. Diademed, bearing a mace and a discus, Thee I desire to see as before. Assume that same four-armed Form, O Thou of thousand arms, of universal Form.

श्रीभगवानुवाच ।

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ।।४७।।

श्रीभगवान् The Blessed Lord उवाच said.

अर्जुन O Arjuna प्रसन्नेन gracious मया by Me आत्मयोगात् by My own Yoga power तव to thee इदं this तेजोमयं resplendent अनन्तम् infinite आद्यं primeval मे of Mine परं supreme विश्वम् universal रूपं Form दर्शितम् has been shown यत् which त्वदन्येन by any other than thyself न not दृष्टपूर्वम् hath been seen before.

The Blessed Lord said:

47. Graciously have I shown to thee, O Arjuna, this Form supreme, by My own Yoga power, this resplendent, primeval, infinite universal Form of Mine, which hath not been seen before by anyone else.

न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ॥
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥

कुरुप्रवीर O great hero of the Kurus न neither वेदयज्ञाध्ययनैः by the study of the Veda and of *Yajña* न nor दानैः by gifts न च nor क्रियाभिः by rituals न nor उग्रैः severe तपोभिः by austerities एवंरूपः in such Form अहं I त्वदन्येन by any other than thee नृलोके in the world of men दृष्टुं to be seen शक्यः possible.

48. Neither by the study of the Veda and *Yajña*, nor by gifts, nor by rituals, nor by severe austerities, am I in such Form seen, in the world of men, by any other than thee, O great hero of the Kurus.

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ॥
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥४९॥

ईदृक् So घोरम् terrible मम of Mine इदम् this रूपं Form दृष्ट्वा having seen मा not ते thine व्यथा fear विमूढभावः bewildered state (अस्तु be) मा च nor व्यपेतभीः with (thy)

fears dispelled प्रीतमनाः with gladdened heart च and पुनः again त्वं thou मे of Mine तत् इदं this former रूपम् एव Form प्रपश्य see (now).

49. Be not afraid nor bewildered, having beheld this Form of Mine, so terrific. With thy fears dispelled and with gladdened heart, now see again this former Form of Mine.

सञ्जय उवाच ।

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ।।५०।।

सञ्जयः Sañjaya उवाच said:

वासुदेवः Vāsudeva अर्जुनं to Arjuna इति thus उक्त्वा having spoken भूयः again तथा so स्वकं His own रूपं Form दर्शयामास showed महात्मा the Great-souled One सौम्यवपुः of gentle Form भूत्वा being पुनः again भीतम् who was terrified एनं him आश्वासयामास pacified च and.

Sañjaya said:

50. So Vāsudeva, having thus spoken to Arjuna, showed again His own Form; and the Great-souled One, assuming His gentle Form, pacified him who was terrified.

अर्जुन उवाच ।

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ।।५१।।

अर्जुनः Arjuna उवाच said:

जनार्दन O Janārdana तव Thy इदं this सौम्यं gentle मानुषं human रूपं Form दृष्ट्वा having seen इदानीम् now (अहं I) सचेताः with thoughts संवृत्तः composed अस्मि am प्रकृतिं (my) nature गतः restored.

Arjuna said:

51. Having seen this Thy gentle human Form, O Janārdana, my thoughts are now composed, and I am restored to my nature.

श्रीभगवानुवाच ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ।।५२।।

श्रीभगवान् The Blessed Lord उवाच said:

मम Mine इदं this सुदुर्दर्शम् very hard to see यत् which रूपं Form दृष्टवान् असि thou hast seen देवाः *Devas* अपि even अस्य रूपस्य of this Form नित्यं ever दर्शनकाङ्क्षिणः (are) desirous to behold.

The Blessed Lord said:

52. Very hard indeed it is to see this

Form of Mine which thou hast seen. Even the *Devas* ever long to behold this Form.

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ।।५३।।

यथा As मां Me दृष्टवान् असि (thou) hast seen एवंविधः like this अहं I न neither वेदैः by the Vedas न nor तपसा by austerity न nor दानेन by gifts न nor इज्यया by sacrifice च and also द्रष्टुं to be seen शक्यः (am) possible.

53. Neither by the Vedas, nor by austerity, nor by gifts, nor by sacrifice can I be seen as thou hast seen Me.

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।।
ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुं च परन्तप ।।५४।।

परन्तप O scorcher of foes अर्जुन Arjuna अनन्यया single-minded भक्त्या by devotion तु but एवंविधः in this Form अहम् I तत्त्वेन in reality ज्ञातुं to be known द्रष्टुं to be seen च and प्रवेष्टुं to be entered into च and also शक्यः (am) possible.

54. But by single-minded devotion I may in this form, be known, O Arjuna, and seen in reality, and also entered into, O scorcher of foes.

*Single-minded devotion*: That devotion which never seeks any other object but the Lord alone, and consequently cognises no other object but the Lord.

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ।।५५।।

पाण्डव O Pāṇḍava यः who मत्कर्मकृत् does work for Me मत्परमः has Me for his goal मद्भक्तः is devoted to Me सङ्गवर्जितः is freed from attachment सर्वभूतेषु towards all creatures निर्वैरः bearing no enmity च and सः he माम् Me एति enters into.

55. He who does work for Me alone and has Me for his goal, is devoted to Me, is freed from attachment, and bears enmity towards no creature—he entereth into Me, O Pāṇḍava.

*Does work for me alone*: Serves Me alone in all forms and manner of ways, with his whole heart and soul, and thus does not become attached to them.

He alone, whose devotion takes the forms as described in this *Śloka* can know and realise Him as He is in reality, and subsequently become one with Him.

इति विश्वरूपदर्शनं नाम एकादशोऽध्यायः ।।

The end of the eleventh chapter, designated, *The Vision of the Universal Form.*

॥ द्वादशोऽध्यायः ॥

# TWELFTH CHAPTER

अर्जुन उवाच ।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

अर्जुनः Arjuna उवाच said:

एवं Thus सततयुक्ताः ever-steadfast ये those भक्ताः devotees त्वां Thee पर्युपासते worship ये those च and अपि also अव्यक्तं the Unmanifested अक्षरम् the Imperishable तेषां of them के which योगवित्तमाः better versed in Yoga.

Arjuna said:

1. Those devotees who, ever-steadfast, thus worship Thee, and those also who worship the Imperishable, the Unmanifested—which of them are better versed in Yoga?

*Thus*: as declared in the last verse of the preceding chapter (XI. 55).

*The Unmanifested*: *Avyakta*: i.e., That which is incomprehensible to the senses, as devoid of all *Upādhis*.

श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ।।२।।

श्रीभगवान् The Blessed Lord उवाच said:

मयि On Me मनः mind आवेश्य fixing नित्ययुक्ताः ever-steadfast परया supreme श्रद्धया with *Śraddhā* उपेताः endowed ये who मां Me उपासते worship ते they युक्ततमाः the best versed in Yoga मे मताः are in My opinion.

The Blessed Lord said:

2. Those who, fixing their mind on Me, worship Me, ever-steadfast, and endowed with supreme *Śraddhā*, they in My opinion are the best versed in Yoga.

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ।।३।।
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।।४।।

सर्वत्र Everywhere समबुद्धयः even-minded ये who तु but च also इन्द्रियग्रामं the aggregate of the senses संनियम्य having subdued अनिर्देश्यम् the Indefinable अव्यक्तं the Unmanifested सर्वत्रगम् the Omnipresent अचिन्त्यं the Unthinkable कूटस्थम् the Unchangeable अचलं the Immovable ध्रुवम् the Eternal अक्षरम् the Unchangeable पर्युपासते worship

सर्वभूतहिते in the welfare of all beings रताः engaged ते they माम् Myself एव only प्राप्नुवन्ति reach.

3-4. But those also, who worship the Imperishable, the Indefinable, the Unmanifested, the Omnipresent, the Unthinkable, the Unchangeable, the Immovable, the Eternal—having subdued all the senses, even-minded everywhere, engaged in the welfare of all beings — verily, they reach only Myself.

*Worship*: *Upāsanā* is approaching the object of worship by way of meditating on it, in accordance with the teachings of the *Śāstras* and the Guru, and dwelling steadily in the current of that one thought, even as a thread of oil poured from one vessel to another.

*Unchangeable*: *Kūṭastha*: lit., remaining like a mass. He who is seated in Māyā as its Witness.

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥

तेषाम् Of those अव्यक्तासक्तचेतसाम् whose mind is set on the Unmanifested अधिकतरः (is) greater क्लेशः trouble हि for देहवद्भिः for the embodied अव्यक्ता the Unmanifested गतिः the goal दुःखं with hard toil अवाप्यते is reached.

5. Greater is their trouble whose minds are set on the Unmanifested; for the goal of the Unmanifested is very hard for the embodied to reach.

*The embodied*: Those who are attached to, or have identified themselves with, their bodies.

No comparison between the worshippers of the conditioned and unconditioned Brahman is meant here—since by the context, both reach the same goal. The path of the conditioned Brahman is described as superior only because it is easier. The path of the unconditioned Brahman is harder, because of the necessity of having to abandon all attachment to the body, from the very beginning of the practice.

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥६॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥७॥

ये Who तु but सर्वाणि all कर्माणि actions मयि in Me संन्यस्य resigning मत्पराः regarding Me as the Supreme Goal अनन्येन single-minded योगेन with Yoga एव verily मां Me ध्यायन्तः meditating उपासते worship पार्थ O son of Pṛthā अहं I मयि on Me आवेशितचेतसाम् of those whose mind is set तेषाम् for them मृत्युसंसारसागरात् out of the ocean of the mortal *Saṁsāra* न चिरात् ere long समुद्धर्ता the Saviour भवामि I become.

6-7. But those who worship Me, resigning all actions in Me, regarding Me as the Supreme Goal, meditating on Me with single-minded Yoga—to these whose mind is set on Me, verily, I become ere long, O son of Pṛthā,

the Saviour out of the ocean of the mortal *Saṁsāra*.

*Mortal Saṁsāra*: The round of birth and death.

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ।।८।।

मयि On Me एव only मनः (thy) mind आधत्स्व fix मयि in Me बुद्धिं (thy) intellect निवेशय place अतः ऊर्ध्वं hereafter मयि in Me एव alone निवसिष्यसि thou shalt live न no संशयः doubt.

8. Fix thy mind on Me only, place thy intellect in Me: (then) thou shalt no doubt live in Me hereafter.

*Mind*: *Manas*—purpose and thought.

*Intellect*: the faculty which resolves and determines.

*Live in Me*: as My Self.

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ।।९।।

धनञ्जय O Dhanañjaya अथ if मयि on Me चित्तं (thy) mind स्थिरम् steadily समाधातुं to fix न शक्नोषि (thou) art unable ततः then अभ्यासयोगेन by *Abhyāsa-Yoga* माम् Me आप्तुं to reach इच्छ do (thou) seek.

9. If thou art unable to fix thy mind steadily on Me, then by *Abhyāsa-Yoga* do thou seek to reach Me, O Dhanañjaya.

*Abhyāsa-Yoga*: the practice of repeatedly withdrawing the mind from the objects to which it wanders, and trying to fix it on one thing.

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ।।१०।।

अभ्यासे (In) *Abhyāsa* अपि also असमर्थः unable to practise असि (if) thou art मत्कर्मपरमः intent on doing actions for My sake भव be thou मदर्थम् for My sake कर्माणि actions कुर्वन् by doing अपि even सिद्धिम् perfection अवाप्स्यसि thou shalt attain.

10. If also thou art unable to practise *Abhyāsa*, be thou intent on doing actions for My sake. Even by doing actions for My sake, thou shalt attain perfection.

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ।।११।।

अथ If अपि even एतत् this कर्तुं to do अशक्तः unable असि thou art ततः then मद्योगम् refuge in Me आश्रितः taking यतात्मवान् self-controlled सर्वकर्मफलत्यागं the renunciation of the fruit of all actions कुरु do.

11. If thou art unable to do even this, then taking refuge in Me, abandon the fruit of all action, being self-controlled.

In the preceding *Ślokas*—first, the concentration of the mind on the Lord is enjoined: in case of inability to do that, *Abhyāsa-Yoga* is advised; if one finds that to be too hard, the performance of actions for the sake of the Lord alone, has been taught: Those who cannot do this even, who want to do things impelled by personal or other desires, are directed to give up the fruits of those actions to the Lord—i.e., not to anticipate, dwell, or build on, or care for, the results. knowing them to be dependent upon the Lord. Those who cannot control their desire for work are taught to practise indifference to the effects thereof.

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ।।१२।।

अभ्यासात् Than (blind) *Abhyāsa* ज्ञानम् knowledge हि indeed श्रेयः better ज्ञानात् than (mere) knowledge ध्यानं meditation (with knowledge) विशिष्यते is more esteemed ध्यानात् than meditation कर्मफलत्यागः the renunciation of the fruit of action त्यागात् from renunciation अनन्तरम् immediately शान्तिः peace (भवति follows).

12. Better indeed is knowledge than (blind) *Abhyāsa*; meditation (with knowledge) is more esteemed than (mere) knowledge; than meditation the renunciation of the fruit of action; peace immediately follows renunciation.

Renunciation of the fruit of all actions, as a means to the attainment of Bliss, is merely extolled here by the declaration of the superiority of one over another. Wherefore? Because it constitutes a common factor which immediately precedes Peace, both

in the case of the man of wisdom who is steadily engaged in devout contemplation, and also of the ignorant one who, unable to tread the paths taught before, takes it up as the easiest means of Bliss.

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।।१३।।
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ।।१४।।

सर्वभूतानां Of (to) all creatures अद्वेष्टा free from hatred or malevolence मैत्रः friendly करुणः compassionate च and एव even निर्ममः who is free from the idea of "mineness" निरहङ्कारः free from egoism, from the notion of "I" समदुःखसुखः even-minded in pain and pleasure क्षमी forbearing सततं ever सन्तुष्टः content योगी steady in contemplation यतात्मा self-controlled दृढनिश्चयः possessed of firm conviction मयि in Me अर्पितमनोबुद्धिः with mind and intellect fixed यः who मद्भक्तः devoted to Me सः he मे to Me प्रियः (is) dear.

13-14. He who hates no creature, and is friendly and compassionate towards all, who is free from the feelings of "I and mine", even-minded in pain and pleasure, forbearing, ever content, steady in meditation, self-controlled, and possessed of firm conviction, with mind and intellect fixed on Me—he who is thus devoted to Me, is dear to Me.

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ।।१५।।

यस्मात् From whom लोकः the world न not उद्विजते is agitated, afflicted, यः who च and लोकात् from the world न not उद्विजते is agitated यः who च and हर्षामर्ष-भयोद्वेगैः by (from) joy, envy, fear, and anxiety मुक्तः freed सः he मे to Me प्रियः (is) dear.

15. He by whom the world is not agitated and who cannot be agitated by the world, who is freed from joy, envy, fear, and anxiety—he is dear to Me.

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ।।१६।।

अनपेक्षः (who is) free from dependence शुचिः who is pure दक्षः prompt उदासीनः unconcerned गतव्यथः untroubled सर्वारम्भपरित्यागी renouncing every undertaking यः who मद्भक्तः devoted to Me सः he मे to Me प्रियः (is) dear.

16. He who is free from dependence, who is pure, prompt, unconcerned, untroubled, renouncing every undertaking—he who is thus devoted to Me, is dear to Me.

*Free from dependence*: on the body, the senses, the sense-objects, and their mutual connections.

*Prompt*: able to decide rightly and immediately in matters demanding prompt action.

*Every undertaking*: calculated to secure objects of desire, whether of this world or of the next.

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।।
शुभाशुभपरित्यागी भक्तिमान् य: स मे प्रिय: ।।१७।।

य: Who न neither हृष्यति rejoices न nor द्वेष्टि hates न nor शोचति grieves न nor कांक्षति desires शुभाशुभपरित्यागी renouncing good and evil य: who भक्तिमान् full of devotion स: he मे to Me प्रिय: (is) dear.

17. He who neither rejoices, nor hates, nor grieves, nor desires, renouncing good and evil, full of devotion, he is dear to Me.

*Hates*: Frets at receiving anything undesirable.

*Grieves*: at parting with a beloved object.

*Desires*: the unattained.

सम: शत्रौ च मित्रे च तथा मानापमानयो: ।।
शीतोष्णसुखदु:खेषु सम: सङ्गविवर्जित: ।।१८।।
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।।
अनिकेत: स्थिरमतिर्भक्तिमान्मे प्रियो नर: ।।१९।।

शत्रौ To foe मित्रे to friend च and तथा also च and मानापमानयो: in honour and dishonour सम: (who is) the same शीतोष्णसुखदु:खेषु in cold and heat, in pleasure and

pain समः the same सङ्गविवर्जितः free from attachment तुल्यनिन्दास्तुतिः to whom censure and praise are equal मौनी who is silent येन केनचित् with anything सन्तुष्टः content अनिकेतः homeless स्थिरमतिः steady-minded भक्तिमान् full of devotion नरः (that) man मे to Me प्रियः (is) dear.

18-19. He who is the same to friend and foe, and also in honour and dishonour; who is the same in heat and cold, and in pleasure and pain; who is free from attachment; to whom censure and praise are equal; who is silent, content with anything, homeless, steady-minded, full of devotion—that man is dear to Me.

*Content with anything, homeless*: content with the bare means of bodily sustenance. Says the *Mahābhārata*:

येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचनशायी स्यात्तन्देवा ब्राह्मणं विदुः ॥

"Who is clad with anything, who is fed on any food, who lies down anywhere, him the gods call a *Brāhmaṇa*."—Śānti-Parva.

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥

ये Who तु indeed यथोक्तं as declared (above) इदं this धर्म्यामृतम् Immortal Dharma पर्युपासते follow श्रद्दधानाः endued with *Śraddhā* मत्परमाः regarding Me as the

Supreme Goal भक्ता: devoted ते they अतीव exceedingly मे to Me प्रिया: (are) dear.

20. And they who follow this Immortal Dharma, as described above, endued with *Śraddhā* regarding Me as the Supreme Goal, and devoted—they are exceedingly dear to Me.

इति भक्तियोगो नाम द्वादशोऽध्याय: ।।

The end of the twelfth chapter, designated, *The Way of Devotion.*

॥ त्रयोदशोऽध्यायः ॥

# THIRTEENTH CHAPTER

अर्जुन उवाच ।
प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥

अर्जुनः Arjuna उवाच said:

केशव O Keśava प्रकृतिं the *Prakṛti* पुरुषं *Puruṣa* च and एव also क्षेत्रं *Kṣetra* क्षेत्रज्ञम् the knower of the *Kṣetra* च and एव also ज्ञानं knowledge ज्ञेयं what ought to be known च and एतत् this वेदितुम् to know इच्छामि (I) desire.

Arjuna said:

*Prakṛti* and *Puruṣa*, also the *Kṣetra* and the knower of the *Kṣetra*, knowledge, and that which ought to be known — these, O Keśava, I desire to learn.

This verse is omitted in many editions.

श्रीभगवानुवाच ।
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ॥
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

कौन्तेय O son of Kuntī इदं this शरीरं body क्षेत्रम् *Kṣetra* इति thus अभिधीयते is called यः who एतत् this वेत्ति knows तद्विदः who know of them तं him क्षेत्रज्ञः the knower of the *Kṣetra* इति as प्राहुः they call.

The Blessed Lord said:

1. This body, O son of Kuntī, is called, *Kṣetra*, and he who knows it is called *Kṣetrajña* by those who know of them (*Kṣetra* and *Kṣetrajña*).

*Kṣetra*: Literally, field; the body is so called because the fruits of action are reaped in it as in a field.

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ।।२।।

भारत O descendant of Bharata सर्वक्षेत्रेषु in all *Kṣetras* अपि also मां Me च and क्षेत्रज्ञं the *Kṣetrajña* विद्धि do thou know क्षेत्रक्षेत्रज्ञयोः of *Kṣetra* and *Kṣetrajña* यत् which ज्ञानं knowledge तत् that ज्ञानं knowledge मम by Me मतं is considered to be.

2. Me do thou also know, O descendant of Bharata, to be *Kṣetrajña* in all *Kṣetras*. The knowledge of *Kṣetra* and *Kṣetrajña* is considered by Me to be *the* knowledge.

तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ।।३।।

तत् The क्षेत्रं *Kṣetra* यत् what (is) च and यादृक् what its properties च and यद्विकारि what its modifications यत: from what (causes) च and यत् what (effects arise) स: he (is) च and य: who यत्प्रभाव: what its powers च and तत् that समासेन in brief मे from Me शृणु hear.

3. What the *Kṣetra* is, what its properties are, what its modifications are, what effects arise from what causes, and also who He is and what His powers are, that hear from Me in brief.

*That*: the true nature of *Kṣetra* and *Kṣetrajña* in all these specific aspects.

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधै: पृथक् ।।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितै: ।।४।।

ऋषिभि: By *Ṛṣis* विविधै: various छन्दोभि: in chants पृथक् distinctive बहुधा in many ways गीतं has been sung विनिश्चितै: convincing हेतुमद्भि: full of reasoning ब्रह्मसूत्रपदै: in phrases indicative of Brahman च and एव also.

4. (This truth) has been sung by *Ṛṣis* in many ways, in various distinctive chants, in passages indicative of Brahman, full of reasoning, and convincing.

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ॥
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥५॥
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ॥
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥६॥

महाभूतानि The great Elements अहङ्कारः Egoism बुद्धिः Intellect अव्यक्तम् the Unmanifested (*Mūlā Prakṛti*) च and एवं also दश ten इन्द्रियाणि the senses एकं the one (mind) च and पञ्च five इन्द्रियगोचराः objects of the senses च and इच्छा desire द्वेषः hatred सुखं pleasure दुःखं pain सङ्घातः the aggregate, the body चेतना intelligence धृतिः fortitude एतत् this सविकारम् with its modifications क्षेत्रं *Kṣetra* समासेन briefly उदाहृतम् has been described.

5-6. The great Elements, Egoism, Intellect, as also the Unmanifested (*Mūlā Prakṛti*), the ten senses and the one (mind), and the five objects of the senses; desire, hatred, pleasure, pain, the aggregate, intelligence, fortitude—the *Kṣetra* has been thus briefly described with its modifications.

The *Sāṅkhyas* speak of those mentioned in the fifth *Śloka* as the twenty-four *Tattvas* or Principles.

*The great Elements*: *Mahābhūtas*—pervade all *Vikāras*, modifications of matter.

*Aggregate*: *Saṁghāta*—combination of the body and the senses.

Desire and other qualities which the *Vaiśeṣikas* speak of as inherent attributes of the Ātman, are spoken of in the sixth *Śloka* as merely the attributes of *Kṣetra*, and not the attributes of *Kṣetrajña*. Desire and other qualities mentioned here, stand for all the qualities of the *Antaḥ-karaṇa* or inner sense—as mere mental states. Each of them, being knowable, is *Kṣetra*.

The *Kṣetra*, of which the various modifications in their totality are spoken of as "this body" in the first *Śloka*, has been here dwelt upon in all its different forms, from "The great Elements" to "fortitude".

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ।।७।।

अमानित्वम् Humility अदम्भित्वम् unpretentiousness अहिंसा non-injury क्षान्तिः forbearance आर्जवम् uprightness आचार्योपासनं service to the teacher शौचं purity स्थैर्यम् steadiness आत्मविनिग्रहः self-control.

7. Humility, unpretentiousness, non-injury, forbearance, uprightness, service to the teacher, purity, steadiness, self-control;

*Ācārya*: one who teaches the means of attaining *Mokṣa*.

*Purity*: external and internal. The former consists in washing away the dirt from the body by means of water, etc., and the latter—the purity of mind—consists in the removal from it of the dirt of attachment and other passions, by the recognition of evil in all objects of the senses.

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ।।८।।

इन्द्रियार्थेषु Of sense-objects वैराग्यम् renunciation अनहङ्कारः absence of egoism एव also च and जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् reflection on the evils of birth, death, old age, sickness, and pain.

8. The renunciation of sense-objects, and also absence of egoism; reflection on the evils of birth, death, old age, sickness, and pain;

*Sense-objects*: such as sound, touch, etc., of pleasures seen or unseen.

*Pain*: whether *Ādhyātmika*, i.e., arising in one's own person; or *Ādhibhautika*, i.e., produced by external agents, or *Ādhidaivika*, i.e., produced by supernatural beings.

*Reflection . . . . pain*: or the passage may be interpreted as reflection on the evils and miseries of birth, death, old age, and sickness. Birth, etc., are all miseries, not that they are miseries in themselves, but because they produce misery. From such reflection arises indifference to sense-pleasures, and the senses turn towards the Innermost Self for knowledge.

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ।।९।।

असक्तिः Non-attachment पुत्रदारगृहादिषु with son, wife, home, and the rest अनभिष्वङ्गः non-identification of self इष्टानिष्टोपपत्तिषु in the occurrence of the desirable and the undesirable नित्यं constant समचित्तत्वम् even-mindedness च and.

9. Non-attachment, non-identification of self with son, wife, home, and the rest, and constant even-mindedness in the occurrence of the desirable and the undesirable;

*Identification of self*: as in the case of a person who feels happy or miserable when another to whom he is attached, is happy or miserable, and who feels himself alive or dead when his beloved one is alive or dead.

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ।।१०।।

मयि To Me अनन्ययोगेन by the Yoga of non-separation अव्यभिचारिणी unswerving भक्तिः devotion च and विविक्तदेशसेवित्वम् resort to sequestered places जनसंसदि for the society of men अरतिः distaste;

10. Unswerving devotion to Me by the Yoga of non-separation, resort to sequestered places, distaste for the society of men;

*Resort . . . places*: favourable to equanimity of mind, so that uninterrupted meditation on the Self, and the like, may be possible.

*Society of men*: of the unenlightened and undisciplined people, not of the pure and holy, because association with the latter leads to *Jñāna*.

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ।।११।।

अध्यात्मज्ञाननित्यत्वम् Constant application to spiritual knowledge तत्त्वज्ञानार्थदर्शनम् understanding of the end of true knowledge एतत् this ज्ञानम् knowledge इति thus प्रोक्तम् is declared यत् what अतः to it अन्यथा opposed अज्ञानं ignorance.

11. Constant application to spiritual knowledge, understanding of the end of true knowledge: this is declared to be knowledge, and what is opposed to it is ignorance.

These attributes—from "Humility" to "Understanding of the end of true knowledge"—are declared to be knowledge, because they are the means conducive to knowledge.

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ।।१२।।

यत् Which ज्ञेयं has to be known तत् that प्रवक्ष्यामि I shall describe यत् which ज्ञात्वा knowing अमृतम् Immortality अश्नुते (one) attains to तत् it अनादिमत् the beginningless परं Supreme ब्रह्म Brahman न neither सत् being न nor असत् non-being उच्यते is called.

12. I shall describe that which has to be known, knowing which one attains to immortality, the beginningless Supreme Brahman. It is called neither being nor non-being.

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ॥
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३॥

सर्वतः Everywhere पाणिपादं with hands and feet सर्वतः everywhere अक्षिशिरोमुखम् with eyes, heads, and mouths सर्वतः everywhere श्रुतिमत् with ears तत् That लोके in the universe सर्वम् all आवृत्य pervading तिष्ठति exists.

13. With hands and feet everywhere, with eyes, heads, and mouths everywhere, with ears everywhere in the universe—That exists pervading all.

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ॥
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१४॥

सर्वेन्द्रियगुणाभासं Shining by the functions of all the senses सर्वेन्द्रियविवर्जितम् (yet) without the senses असक्तं devoid of all attachment or relativity, Absolute सर्वभृत् sustaining all चैव yet निर्गुणं devoid of *Guṇas* गुणभोक्तृ experiencer of the *Guṇas* च and.

14. Shining by the functions of all the senses, yet without the senses; Absolute, yet sustaining all; devoid of *Guṇas*, yet their experiencer.

बहिरन्तश्च भूतानामचरं चरमेव च ॥
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१५॥

भूतानाम् (Of all) beings बहिः without च and अन्तः within अचरं the unmoving चरम् the moving एव also च and सूक्ष्मत्वात् because of its subtlety तत् It अविज्ञेयं (is) incomprehensible दूरस्थं is far च and अन्तिके near च and तत् It.

15. Without and within (all) beings; the unmoving and also the moving; because of Its subtlety incomprehensible; It is far and near.

*Incomprehensible*: to the unillumined, though knowable in Itself.

*Far*: when unknown.

*Near*: to the illumined, because It is their own Self.

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ॥
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६॥

भूतेषु In beings च and अविभक्तं impartible विभक्तम् divided च yet इव as if स्थितम् existing भूतभर्तृ as sustaining beings च and ग्रसिष्णु devouring प्रभविष्णु as generating च as well तत् It ज्ञेयं is to be known.

16. Impartible, yet It exists as if divided in beings: It is to be known as sustaining beings; and devouring, as well as generating (them).

*Devouring*: at the time of *Pralaya*.

*Generating*: at the time of *Utpatti* or origin of the universe.

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥१७॥

ज्योतिषाम् Of lights अपि even ज्योतिः Light तमसः darkness परम् beyond तत् It उच्यते is said (to be) ज्ञानं Knowledge ज्ञेयं the One Thing to be known ज्ञानगम्यं the Goal of knowledge सर्वस्य of all हृदि in the heart धिष्ठितम् dwelling.

17. The Light even of lights, It is said to be beyond darkness; Knowledge, and the One Thing to be known, the Goal of knowledge, dwelling in the hearts of all.

*The Light even of lights*: The illuminator of all illuminating things, such as the sun, etc., and *Buddhi*, etc. Indeed, these latter shine only when illuminated by the Light of the consciousness of the Self.

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१८॥

इति Thus क्षेत्रं *Kṣetra* तथा and ज्ञानं knowledge ज्ञेयं that which has to be known च and समासतः briefly उक्तं have been stated मद्भक्तः My devotee एतत् this विज्ञाय knowing मद्भावाय for My state उपपद्यते is fitted.

18. Thus *Kṣetra*, knowledge, and that which has to be known, have been briefly stated. Knowing this, My devotee is fitted for My state.

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ।।१९।।

प्रकृतिं *Prakṛti* पुरुषं *Puruṣa* च and एव indeed उभौ both अपि also अनादी beginningless विद्धि know (thou) विकारान् (all) modifications च and गुणान् *Guṇas* च and एव also प्रकृतिसम्भवान् born of *Prakṛti* विद्धि know (thou).

19. Know thou that *Prakṛti* and *Puruṣa* are both beginningless; and know-thou also that all modifications and *Guṇas* are born of *Prakṛti*.

*Modifications*: *Vikāras*—From *Buddhi* down to the physical body.

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ।।२०।।

कार्यकरणकर्तृत्वे In the production of the body and the senses प्रकृतिः *Prakṛti* हेतुः the cause उच्यते is said (to be) पुरुषः *Puruṣa* सुखदुःखानां of pleasure and pain भोक्तृत्वे in the experience हेतुः the cause उच्यते is said (to be).

20. In the production of the body and the senses, *Prakṛti* is said to be the cause; in the experience of pleasure and pain, *Puruṣa* is said to be the cause.

*Senses*: five organs of perception, five of action, mind, intellect, and egoism.

*Puruṣa*: the *Jīva* is meant here.

*Kārya*: The effect, the physical body. *Karaṇa*: Senses. Some read *Kāraṇa*, and explain "*Kārya* and *Kāraṇa*" as "effect and cause"

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ॥
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥२१॥

हि Indeed पुरुषः *Puruṣa* प्रकृतिस्थः seated in *Prakṛti* प्रकृतिजान् born of *Prakṛti* गुणान् the *Guṇas* भुङ्क्ते experiences अस्य its सदसद्योनिजन्मसु of birth in good and evil wombs गुणसङ्गः attachment to the *Guṇas* कारणं the reason.

21. *Puruṣa* seated in *Prakṛti*, experiences the *Guṇas* born of *Prakṛti*; the reason of his birth in good and evil wombs is his attachment to the *Guṇas*.

*Seated in*: identifying himself with.

*Guṇas*: manifesting themselves as pleasure, pain, and delusion.

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ॥
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥२२॥

अस्मिन् देहे In this body पुरुषः *Puruṣa* परः Supreme उपद्रष्टा the Looker-on अनुमन्ता the Permitter च and भर्ता Supporter भोक्ता the Experience महेश्वरः the Great Lord परमात्मा the Highest Self च and इति thus अपि also उक्तः is called.

22. And the Supreme *Puruṣa* in this body is also called the Looker-on, the Permitter, the Supporter, the Experiencer, the Great Lord, and the Highest Self.

*Looker-on, the Permitter*: He himself does not participate in the activities of the bodily organs, the mind and the *Buddhi*, being quite apart from them, yet appears to be so engaged. And being a looker-on, He never stands in the way of the activities of *Prakṛti* as manifested in the body. Indeed, all the consciousness or intelligence that manifests itself in the activities of life is but the reflection of the All-pervading, Absolute, and Perfect Intelligence —the Supreme Spirit.

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ।।२३।।

यः Who एवं thus पुरुषं the *Puruṣa* गुणैः सह with *Guṇas* प्रकृतिं *Prakṛti* च and वेत्ति knows सः he सर्वथा in whatever way वर्तमानः living अपि even भूयः again न not अभिजायते is born.

23. He who thus knows the *Puruṣa* and *Prakṛti* together with the *Guṇas*, whatever his life, is not born again.

*Whatever his life, etc.*: Whether he be engaged in prescribed or forbidden acts, he is not born again. For, the acts, the seeds of rebirth, of a knower of Truth are burnt by the fire of knowledge, and thus cannot be effective causes to bring about births. In his case they are mere semblances of *Karma*; a burnt cloth, for instance, cannot serve the purposes of a cloth.

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ।।२४।।

केचित् Some ध्यानेन by meditation आत्मनि in their own intelligence आत्मना by the purified heart आत्मानम् the Self पश्यन्ति behold अन्ये others सांख्येन योगेन by the path of knowledge अपरे others च again कर्मयोगेन by Karma-Yoga:

24. Some by meditation behold the Self in their own intelligence by the purified heart, others by the path of knowledge, others again by Karma-Yoga.

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ।।२५।।

अन्ये Others तु again एवम् thus अजानन्तः not knowing अन्येभ्यः from others श्रुत्वा as (they have) heard उपासते worship ते these अपि च and also श्रुतिपरायणाः regarding what they have heard as the Supreme Refuge मृत्युं death अतितरन्ति go beyond एव even.

25. Others again not knowing thus, worship as they have heard from others. Even these go beyond death, regarding what they have heard as the Supreme Refuge.

*Not knowing thus*: not able to know the Self described above, by one of the several methods as pointed out.

*From others*: *Ācāryas* or spiritual teachers.

*Regarding*: following with *Śraddhā*.

*What they have heard*: i.e., they solely depend upon the authority of others' instructions.

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ॥
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२६॥

भरतर्षभ O bull of the Bhāratas यावत् किञ्चित् whatever स्थावरजङ्गमम् the moving and the unmoving सत्त्वं being सञ्जायते is born तत् it क्षेत्रक्षेत्रज्ञसंयोगात् from the union of *Kṣetra* and *Kṣetrajña* विद्धि know (to be).

26. Whatever being is born, the moving or the unmoving, O bull of the Bhāratas, know it to be from the union of *Kṣetra* and *Kṣetrajña*.

*Union . . . Kṣetrajña*: The union of *Kṣetra* and *Kṣetrajña*, of the object and the subject, is of the nature of mutual *Adhyāsa* which consists in confounding them as well as their attributes with each other, owing to the absence of discrimination of their real nature. This false knowledge vanishes when one is able to separate *Kṣetra* from *Kṣetrajña*.

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ॥
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२७॥

सर्वेषु All भूतेषु in beings समं equally तिष्ठन्तं existing विनश्यत्सु in the dying अविनश्यन्तं deathless परमेश्वरम् the Supreme Lord यः who पश्यति sees सः he पश्यति sees.

27. He sees, who sees the Supreme Lord, existing equally in all beings, deathless in the dying.

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ।।२८।।

हि Since सर्वत्र everywhere समं equally समवस्थितम् existent ईश्वरम् the Lord पश्यन् seeing आत्मना by self आत्मानं Self न not हिनस्ति injures ततः so परां highest गतिम् the Goal याति (he) goes to.

28. Since seeing the Lord equally existent everywhere, he injures not Self by self, and so goes to the highest Goal.

*He injures . . . by self*: like the ignorant man either by ignoring the Self in others (*Avidyā* or nescience), or regarding the non-Self (physical body, etc.) as the Self (*Mithyā-jñāna* or false knowledge)—the two veils that hide the true nature of the Self.

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।।
यः पश्यति तथात्मानमकर्तारं स पश्यति ।।२९।।

यः Who च and कर्माणि actions प्रकृत्या by *Prakṛti* एव alone सर्वशः all क्रिय माणानि being done तथा and आत्मानम् the Self अकर्तारं actionless पश्यति sees सः he पश्यति sees.

29. He sees, who sees that all actions are done by *Prakṛti* alone and that the Self is actionless.

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥३०॥

यदा When भूतपृथग्भावम् the separate existence of all beings एकस्थम् inherent in the One अनुपश्यति sees ततः from That एव alone विस्तारं (their) expansion च and तदा then ब्रह्म Brahman सम्पद्यते (he) becomes.

30. When he sees the separate existence of all beings inherent in the One, and their expansion from That (One) alone, he then becomes Brahman.

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥३१॥

कौन्तेय O son of Kuntī अनादित्वात् being without beginning निर्गुणत्वात् being devoid of *Guṇas* अयम् this अव्ययः immutable परमात्मा Supreme Self शरीरस्थः existing in the body अपि though न neither करोति acts न nor लिप्यते is affected.

31. Being without beginning and devoid of *Guṇas*, this Supreme Self, immutable, O son of Kuntī, though existing in the body neither acts nor is affected.

*Being without beginning*: having no cause.

*Neither . . . affected*: Because the Self is not the doer, therefore He is not touched by the fruit of action.

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ।।३२।।

यथा As सर्वगतं the all-pervading आकाशं *Ākāśa* सौक्ष्म्यात् because of its subtlety न not उपलिप्यते is tainted तथा so सर्वत्र everywhere देहे in the body अवस्थित: existent आत्मा the Self न not उपलिप्यते is tainted.

32. As the all-pervading *Ākāśa*, because of its subtlety, is not tainted, so the Self existent everywhere in the body, is not tainted.

यथा प्रकाशयत्येक: कृत्स्नं लोकमिमं रवि: ।।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ।।३३।।

भारत O descendant of Bharata यथा as एक: the one रवि: sun इमं this कृत्स्नं all लोकम् world प्रकाशयति illumines तथा so क्षेत्री He who abides in the *Kṣetra* कृत्स्नं the whole क्षेत्रं *Kṣetra* प्रकाशयति illumines.

33. As the one sun illumines all this world, so does He who abides in the *Kṣetra*, O descendant of Bharata, illumine the whole *Kṣetra*.

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ।।३४।।

एवम् Thus क्षेत्रक्षेत्रज्ञयो: between the *Kṣetra* and the *Kṣetrajña* अन्तरं the distinction भूतप्रकृतिमोक्षं the emancipation from the *Prakṛti* of beings च and (also) ज्ञानचक्षुषा with the eye of knowledge ये who विदु: perceive ते they परम् the Supreme यान्ति go to.

34. They who thus with the eye of knowledge perceive the distinction between the *Kṣetra* and the *Kṣetrajña*, and also the emancipation from the *Prakṛti* of beings, they go to the Supreme.

*Prakṛti of beings*: the material nature or delusion of beings due to *Avidyā*.

इति क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्याय: ॥

The end of the thirteenth chapter designated, *The Discrimination of the Kṣetra and the Kṣetrajña.*

॥ चतुर्दशोऽध्यायः ॥

## FOURTEENTH CHAPTER

श्रीभगवानुवाच ।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ॥
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१॥

श्रीभगवान् The Blessed Lord उवाच said:

ज्ञानानां Of all knowledge उत्तमम् the best परं supreme ज्ञानम् knowledge भूयः again प्रवक्ष्यामि I shall tell यत् which ज्ञात्वा having known सर्वे all मुनयः the *Munis* इतः after this life परां high सिद्धिम् perfection गताः have attained to.

The Blessed Lord said:

1. Again I shall tell thee that supreme knowledge which is above all knowledge, having known which all the *Munis* have attained to high perfection after this life.

*After this life*: after being freed from this bondage of the body.

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२॥

इदं This ज्ञानम् knowledge उपाश्रित्य having devoted to मम साधर्म्यम् My Being आगताः have attained to सर्गे at the

time of creation अपि न neither उपजायन्ते are born प्रलये at the time of dissolution न च nor व्यथन्ति are (they) troubled.

2. They who, having devoted themselves to this knowledge, have attained to My Being, are neither born at the time of creation, nor are they troubled at the time of dissolution.

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ॥
सम्भवः सर्वभूतानां ततो भवति भारत ॥३॥

भारत O descendant of Bharata महत् the great ब्रह्म *Prakṛti* मम My योनिः womb तस्मिन् in that अहम् I गर्भं the germ दधामि place ततः thence सर्वभूतानां of all beings सम्भवः the birth भवति is.

3. My womb is the great *Prakṛti*; in that I place the germ; from thence, O descendant of Bharata, is the birth of all beings.

*Brahma*: This word is derived from *Brimh*, "to expand", and means here the vast seed or womb (the *Prakṛti*) out of which the cosmos is evolved or expanded.

*I place the germ*: I infuse the reflection of My Intelligence, and this act of impregnation is the cause of the evolution of the cosmos.

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ॥
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥४॥

कौन्तेय O son of Kuntī सर्वयोनिषु in all the wombs याः whatever मूर्तयः forms सम्भवन्ति are produced तासां their महत् the great ब्रह्म *Prakṛti* योनिः womb अहं I बीजप्रदः seed-giving पिता Father.

4. Whatever forms are produced, O son of Kuntī, in all the wombs, the great *Prakṛti* is their womb, and I the seed-giving Father.

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।५।।

